# Indian Epistemology

## Proceedings of National Seminar

Editor

**Renuka K. C.**

श्री शङ्कराचार्य संस्कृतसर्वकलाशाला

**Dept. Of Sanskrit Nyaya**
**Sree Sankaracharya University of Sanskrit**
**Silver Jubilee Year**
**March 2018**

***Indian Epistemology***

***(Proceedings of National Seminar)***

***Patron***

*Dr. Dharmaraj Adat (V. C. SSUS Kalady)*

*Dr. T.P Ravindran (Registrar, SSUS Kalady)*

*Dr. K.K. Ambikadevi (HOD, Dept. Of Sanskrit Nyaya*

***Publication***

*Dept. Of Sanskrit Nyaya, SSUS Kalady.*

*ISBN: 978-93-5311-034-5*

*March 2018*

*Price: Rs. 400/-*

*(All rights reserved. No part of this publication may be reproduced, distributed, or transmitted in any form or by any means, including photocopying, recording, or other electronic or mechanical methods, without the prior written permission of the publisher)*

Editorial Board

Dr. T. Aryadevi (Former dean, Faculty of Indian Logic)

Dr. K. G. Kumari (Professor, Dept. Of Sanskrit Nyaya)

Dr. V. K. Bhavani. (Assistant Professor, Dept. Of Sanskrit Nyaya)

Smt. Saritha T. P. (Assistant Professor, Dept. Of Sanskrit Nyaya)

# न्यायाद्वैतवेदान्तयोः प्रत्यक्षप्रमाणविमर्शः।

डा. के.रमादेवि अम्मा

धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थ इति जानन्त्येव शास्त्रविदः। तेषाञ्च पुरुषार्थानां प्रत्येकं पुरुषार्थतत्साधनस्वरूपनिरूपणाय पृथक्-पृथक् शास्त्रं पूर्वाचारैः महर्षिभिः निर्मितम्। तदुपरि भाष्याणि च व्याख्यानोपाख्यानि च रचितानि। धर्मशास्त्रं, अर्थशास्त्रं, कामशास्त्रं, मोक्षशास्त्रंचेति नामभिः तानि शास्त्राणि प्रथितानि। धर्मस्य, अर्थस्य, कामस्य, मोक्षस्य च लक्षणानि शास्त्रेषु प्रोक्तानि च। शास्त्रप्रतिपादित तत्त्वनिर्णयस्तु लक्षणप्रमाणाभ्यामेवेतिशास्त्रसम्मतं मतम्। यतो हि लक्षणप्रमाणाभ्यां वस्तुसिद्धिर्भवतीति नियमः।

मानमेयविभागेन वस्तूनां द्विविधा गतिः।
अविपर्यासससिध्यै शोध्यते मानपद्धतिः। इति मानमेयोदोये दृश्यते।

भिन्नेष्वपि दर्शनेषु प्रमाणानां संख्या अपि भिन्ना वर्तन्ते। उक्तं च मानमेयोदये-

चार्वाकस्तावदेकंद्वितयमपिपुनर्बौद्धवैशेषिकौ द्वौ।
भासर्वज्ञश्च सांख्यास्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः।
षट्कं पौराणिकस्त्वष्टकमभिदधिरे संभवैतिह्ययोगात्।।इति।[1]

एवं योऽर्थः प्रतीयते तत् प्रमेयमिति न्यायभाष्ये च दृश्यते।[2] प्रमाणलक्षणञ्च-प्रमाकरणं प्रमाणम् इति वेदान्तपरिभाषायां दृश्यते। प्रमाता येनार्थं प्रमिणोति तत् प्रमाणमिति न्यायभाष्ये, उपलब्धिहेतुः प्रमाणमिति न्यायवार्तिके, प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यात् अर्थवत्प्रमाणमिति तात्पर्यटीकायाञ्च दर्शनात् सर्वाण्यपि दर्शनानि प्रमाणविचारे दत्तादराण्येव दृश्यन्ते। अत एव न्यायदर्शने वैशेषिकदर्शने च षोडशपदार्थानां मध्ये प्रमाणं प्रथम पदार्थ एव। सर्वोऽपि लौकिको वैदिको वा प्रवृत्तिनिवृत्यन्यतररूपो व्यवहारः प्रमाणपुरस्सर एव प्रवर्तते।

एवं विविधेषु प्रमाणेषु प्रत्यक्षप्रमाणमेकमेव आस्तिक नास्तिक भेदं विना सर्वैः दार्शनिकैः एककण्ठेन अङ्गीकृतमिति सर्वे जानन्ति। प्रमाकरणं प्रमाणम् - तत्र चाक्षुषादि यथार्थज्ञानं भवति प्रमा। अस्याः करणं, असाधारणकारणं भवति चक्षुरादि इन्द्रियम्, अतः चक्षुरादि इन्द्रियं प्रमाणम्। एवं व्याप्तिज्ञानम् अनुमितेः करणम्। सादृश्यज्ञानमुपमितेः करणम्। शब्दज्ञानं शाब्दबोधस्य च करणम् इति प्राज्ञाः। प्रत्यक्षशब्दाभिधेयं भवति द्विविधम्- १. इन्द्रियम् (चक्षुरादि) २. ज्ञानम् (प्रमात्मकं ज्ञानम्।) प्रकृतं तु इन्द्रियात्मकप्रत्यक्षप्रमाणमुद्दिश्य विचारः प्रवर्तते। पर्वते वह्न्यनुमानस्य साधनीभूतं धूमज्ञानं प्रत्यक्षप्रमाणाधीनम्। शाब्दज्ञानस्य साधनीभूतं शब्दज्ञानं श्रावणप्रत्यक्षप्रमाणाधीनम्। एवञ्च सर्वप्रमाणोपजीव्यं प्रत्यक्षं प्रमाणम्। प्रत्यक्षमूलकमनुमानं, प्रत्यक्षानुमानमूलकम् आगमः, प्रत्यक्षानुमानागममूलकञ्च उपमानादिकं प्रमाणमिति सर्वप्रमाणेषु प्रत्यक्षस्यैव प्रथमं प्राधान्यं सिद्ध्यति।

न्यायसूत्रे तु इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति सिद्धम्। आत्ममनसंयोगजन्यसुखादिषु अतिव्याप्तिवारणाय ज्ञानपदम्। शाब्दज्ञानस्य प्रत्यक्षत्ववारणाय

---

[1] मानमेयोदयः, मेल्प्पुत्तूर् नारा यणभट्टपादः। प्रमाणसामान्यम्,श्लो.६,पृ.१०

[2]. न्यायभाष्यम्.१.१,पृ.२

अव्यपदेश्यमिति। भ्रमज्ञानस्य प्रत्यक्षत्ववारणाय अव्यभिचारीति। संशयज्ञानस्य प्रत्यक्षत्ववारणाय
व्यवसायात्मकमिति च पदानि निवेशितानि। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन
संयुज्यते ततः प्रत्यक्षमिति प्रक्रिया। इन्द्रियार्थसंयोग एव सन्निकर्ष इत्युच्यते। बाह्यघटपटादि प्रत्यक्षे
प्रसिद्धेयं प्रक्रिया। यदा इन्द्रियेण मनसा सुखदुःखादीनाम् अर्थानां संसर्गो भवति तदा अहम् सुखी
अहम् दुःखी इत्याकारक मानसप्रत्यक्षं भवति। अतः सुखादिकं मानसप्रत्यक्षगोचरमिति न्यायमतम्।
सुखाद्युपलब्धिसाधनमिन्द्रियं मन इति तर्कसंग्रहकारः।

अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा
न्यायभाष्यम्। ततश्च भाष्यरीत्या इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्, इन्द्रियार्थसन्निकर्षो वा प्रत्यक्षमिति
सिद्ध्यति। न्यायलीलावत्यां तु इन्द्रियमात्रकरणकं विद्या इति प्रत्यक्षलक्षणमुच्यते। एवं तार्किकरक्षायां
इन्द्रियजन्यप्रमासाधकतमं प्रत्यक्षमिति लौकिकप्रत्यक्षमात्रस्यलक्षणमुक्त्वा ईश्वरप्रत्यक्षस्यापि संग्रहार्थं
अपरोक्षप्रमाव्याप्तं प्रत्यक्षमिति लक्षणान्तरमुक्तम्। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमेव प्रत्यक्षमिति
तर्ककौमुद्यां तर्कसंग्रहे च उक्तम्। सन्निकर्षध्वंसे अतिव्याप्तिवारणाय ज्ञानमिति। अनुमित्यादौ
अतिव्याप्तिवारणाय इन्द्रियार्थसन्निकर्षेति पदम्।एवं च ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति न्यायचन्द्रिकायां
तर्कसंग्रहे, न्यायसिद्धान्तमुक्तावल्याञ्च दृश्यते। तर्कसंग्रहे तु सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षमिति
लक्षणान्तरमपि अस्ति। इन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति न्यायचन्द्रिकायां, मुक्तावल्यां च, पुनः इन्द्रियजन्यं
इन्द्रियजन्यं ज्ञानमिति पदार्थरत्नमालायां लक्षणानि प्रतिपादितानि। न्यायसिद्धान्तमञ्जर्यां
पदार्थदीपिकायां, न्यायचन्द्रिकायाञ्च साक्षात्काररूपायाः प्रमायाः करणं प्रत्यक्षं, साक्षात्कारोनाम
प्रतीतिसाक्षिक जातिविशेषवत् ज्ञानं प्रत्यक्षं साक्षात्कारिप्रमाणं प्रत्यक्षप्रमाणकरणमिति च लक्षणानि
निरूपितानि।[३] प्रमाकरणानुमानादौ अतिव्याप्तिवारणाय प्रत्यक्षेति, भ्रमप्रत्यक्षकरणे
अतिप्रसङ्गवारणाय प्रमाणपदञ्च निवेशितम्। नानान्यायग्रन्थोक्तप्रत्यक्षप्रमाया असाधारणकारणं यत्
भवति तत् प्रत्यक्षप्रमाणमिति अत्र ध्येयम्।

अद्वैतवेदान्ते तु प्रमाकरणं प्रमाणम् इत्युक्तम्। प्रमा तु अत्र चैतन्यमेव। अत्र तु
चैतन्यमनादि। इन्द्रियार्थसन्निकर्षजन्यंज्ञानमिति प्रत्यक्षस्य लक्षणम् अद्वैतवेदान्ते कथम् उपपद्यते? प्रमा
तु चैतन्यमेव। ज्ञानात्मकं भवति ब्रह्मतत्त्वम्। "सत्यंज्ञानमनन्तं ब्रह्म" इति श्रुतिः। नित्यं चैतन्यं
जन्यम् इति कथम्? इति चेत्- चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जक
अन्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायत इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते
ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। अत्र तु अन्तःकरणस्येन्द्रियतया अतीन्द्रियत्वात् कथं
प्रत्यक्षविषयतेति संशयः। समाधानं तु- न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। मनः
षष्ठानीन्द्रियाणीति भगवद्गीतावचनं प्रमाणमिति चेत् न, अनिन्द्रियेणापि मनसा
षट्त्वसंख्यापूरणाविरोधात्। वृत्तिस्तु संशयो निश्चयो गर्वः स्मरणमिति चतुर्विधा वर्तते। एवं सति
वृत्तिभेदेनैकमप्यन्तःकरणं मन इति बुद्धिरिति अहङ्कार इति चित्तमिति चाख्यायते।

तदुक्तम्- मनोबुद्ध्यहङ्कारश्चित्तं करणमन्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे।। इति।[४]

न्यायमते इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमित्युक्तम्। तत् द्विविधम्- निर्विकल्पकं

[३] भारतीयदर्शनेषु प्रत्यक्षप्रमाणविमर्शः, पण्डिट्. आर्. तङ्कस्वामिशर्मा. पृ.३८-३९.
[४] वेदान्तपरिभाषा, प्रत्यक्षपरिच्छेदः।

सविकल्पकं चेति। निष्प्रकारकं ज्ञानं निर्विकल्पकम्।[५] निष्प्रकारकमित्यस्य प्रकारताख्यविषयताशून्यमित्यर्थः। तस्मात् प्रकारताशून्यज्ञानत्वमेव निर्विकल्पकमित्यर्थः। इदं निर्विकल्पकं ज्ञानं, किञ्चिदनिर्वाच्यं, निराकारमित्यर्थः। सप्रकारकं ज्ञानं सविकल्पकम्।[६] प्रकारताख्यविषयताविशिष्टमित्यर्थः। तद्यथा-डित्थोऽयम्, ब्राह्मणोऽयं, श्यामोऽयं, पाचकोऽयमिति। इदं ज्ञानं डित्थत्वप्रकारकडित्थविशेष्यकं, ब्राह्मणत्वप्रकारकब्राह्मणविशेष्यकं, श्यामत्वप्रकारकश्यामविशेष्यकं भवतीती प्रकारताख्यविषयतानिरूपितत्वस्य तादृशज्ञाने विद्यमानत्वाल्लक्षणसङ्गतिः। प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः। एवं सन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

अद्वैतवेदान्तेऽपि प्रत्यक्षं निर्विकल्पक सविकल्पक भेदेन द्विविधम्। निर्विकल्पकं तु संसर्गानवगाहि ज्ञानम्। यथा तत्त्वमसि, सोऽयं देवदत्तः इत्यादि वाक्यजन्यं ज्ञानम्। विकल्पः विशेषणं विभागो वा। निः-नास्ति विकल्पो यस्य सः निर्विकल्पः। वैशिष्ट्यवगाहि ज्ञानं सविकल्पकम्। यथा घटमहं जानामीत्यादि ज्ञानम्। विकल्पेन सह विद्यमानो यः सविकल्पः। तथाच अहं ब्रह्म जानामि इत्यादि विशिष्टबुद्ध्यन्तर्गत ज्ञातृज्ञानज्ञेयरूपाणां विकल्पानां हानात् निर्विकल्पः। तथा अपरित्यागात् सविकल्पः। ज्ञातृज्ञेयादिविभागशून्यं ब्रह्मात्मैकत्वविषयं सजातीय- विजातीय-स्वगतभेदशून्यत्व-अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्व संसर्गानवगाहि यथार्थज्ञानजनकत्वरूपाखण्डाकारकं विशेषणविशेष्यसंबन्धरहितं वा ज्ञानं निर्विकल्प्कम् इत्यर्थः।

पुनश्च प्रत्यक्षं द्विविधम्- जीवसाक्षि, ईश्वरसाक्षि चेति। तत्र जीवो नाम अन्तःकरणावच्छिन्नचैतन्यम्, तत्साक्षि तु अन्तःकरणोपहितचैतन्यमेव। अन्तः करणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः। विशेषणञ्च कार्यान्वयि व्यावर्तकं च। उपाधिश्च कार्यान्वयी व्यावर्तको वर्तमानश्च। रूपादिविशिष्टो घटोनित्य इत्यत्र रूपं विशेषणम्, कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः। अयमेवोपाधिः नैयायिकैः परिचायक इत्युच्यते। जीवसाक्षी तु प्रत्यात्मं नाना एव। ईश्वरसाक्षी तु मायोपहितं चैतन्यमेव। तदुपाधिभूतमायायाः एकत्वात् तच्चैकम् च।

**उपसंहारम्।**

अद्वैतवेदान्ते सविकल्पकादि सर्वभेदस्तु वृत्तिविशेष एव। सर्वा अपि वृत्तयः चक्षुरादीन्द्रियसन्निकर्षजन्या भवन्ति। वृत्ति अभिव्यञ्जकाः सन्निकर्षाः वृत्तेः ज्ञानत्वोपचारो भवति। तस्मात् वृत्यात्मकज्ञानं जायते इन्द्रियात्। अतः इन्द्रियाणि भवन्ति वेदान्तेऽपि प्रत्यक्षप्रमाणशब्दाभिधेयानि। न्याये यथा चक्षुरादीन्द्रियाणि प्रत्यक्षप्रमाणभूतानि, तथा अद्वैतवेदान्ते च तान्येवेन्द्रियाणि प्रत्यक्षप्रमाणभूतानि। किन्तु न्याये मनसः नित्यत्वं, द्रव्यत्वं, अणुत्वं, गुणवत्त्वं, जातिमत्वं, सुखाद्युपलब्धिसाधनत्वं च उपपन्नं भवति, न तथा अद्वैत वेदान्ते, मनसः स्वतन्त्र पदार्थत्वं नास्त्येव। मन इति व्यवहारो यद्यपि वर्तते तत् मनस्तु अन्तःकरणं बोधयति। सुतरामत्र न्यायाद्वैतवेदान्तमतयोर्मध्ये वैषम्यमनुभूयते।

---

[५] तर्कसंग्रहः,प्रत्यक्षपरिच्छेदः।

[६] तर्कसंग्रहः,प्रत्यक्षपरिच्छेदः।

**ग्रन्थसूची।**


१. मानमेयोदयः, मेल्प्पुत्तूर् नारायणभट्टपादः।

२. वेदान्तपरिभाषा- धर्मराजाध्वरीन्द्रः।

३. तर्कसंग्रहः- अन्नम्भट्टः ।

४. भारतीयदर्शनेषु प्रत्यक्षप्रमाणविमर्शः- पण्डिट्. आर्. तङ्कस्वामिशर्मा.

५. कारिकावलि- विश्वनाथन्यायपञ्चानन भट्टाचार्य।